Shodhshauryam, International Scientific Refereed Research Journal
Available online at : www.shisrrj.com
OPEN ACCESS
© 2025 SHISRRJ | Volume 8 | Issue 1
ISSN : 2581-6306
doi : https://doi.org/10.32628/SHISRRJ25844

# ओमानराष्ट्रशतकस्यपरिचय:

**डा.प्रदीपकुमार बाग्**
सहाचार्य:,साहित्यविभाग:, राष्ट्रिय संस्कृत विश्वविद्यालय:, तिरुपति:, आन्ध्रप्रदेश:

**Article Info**
Accepted : 02 Feb 2025
Published : 20 Feb 2025
**Publication Issue :**
January-February-2025
Volume 8, Issue 1
**Page Number :** 260-265

**सारांश:-** ओमानराष्ट्रशतकस्य नामकरणम्, मस्काटशद्वस्य व्युत्पत्ति:, ओमानराष्ट्रशतकस्योद्देश्यम्, मस्काटनगरीवर्णनम्, ओमानदेशस्य सौन्दर्यवर्णनम्, विषयवस्तुश्च मया सरलरीत्या शोधलेखे उपस्थाप्यते।

**मुख्यशद्व:**-मस्काटम्, राजमार्गम्, सन्नतपर्वतम्, ए.एल् हजरपर्वत, ओमानदेश:, विमानयात्रा, ओमनीमुद्रा, समाज:, प्रशासनिकश्रृङ्खला।

संस्कृतसाहित्याकाशे नैके कवयस्सन्ति। तेषु कविषु केचन सहृययानां सामाजिकानां हृदये चिरकालं तिष्ठन्ति। तस्य कारणं भवति कवे: अलौकिकं काव्यमाधुर्यम्। काव्यनिर्माणक्षेत्रे आधुनिककविना आचार्येण किशोरचन्द्रमहापात्रमहोदयेन विरचितम् ओमानराष्ट्रशतकम् इति प्रसिद्धकाव्यमपि सिद्धम् ।

**ओमानराष्ट्रशतकस्य नामकरणम्** – ओमानराष्ट्रमधिकृत्य विलिखितं षडाधिकैकशतंपद्यानि, अस्मात्कारणात् काव्यस्य नामकरणम् “ओमानराष्ट्रशतकम्” इति कृतम्।

**मस्काटशब्दस्य व्युत्पत्ति:** -ओमानदेशस्य राजधानी भवति मस्काटम्। आरवीयभाषायां मस्काटशब्दस्य व्युत्पत्तिर्भवति “मास्” इत्युक्ते मत्स्यम्, गाड् इति पदेन स्थानमिति अर्थ:। एवं “मासगाड्” इत्यत: मस्काट् इति पदं सञ्जातम् । यस्यार्थो भवति मत्स्यस्थानमिति।

**ओमानराष्ट्रशतकस्योद्देश्यम्** – एकदा कवि: स्वकीयज्येष्ठपुत्रस्य आह्वानक्रमेओमानदेशं प्रति गतवान्। ओमानदेशस्य राजधानी भवति मस्काटनगरी। तत्रस्थसुशोभनं राजमार्गम्, सून्नतपर्वतान्, अतीव मनोहरं वेलाभूमिं, मनोहराणि दर्शनीयस्थानानि एतत्सर्वं दृष्ट्वातेषां मनसिकाव्यं लिखितुमुत्कण्ठाऽऽगता । यथोक्तं कविना –

**दृष्ट्वा तदीयसुषमां प्रकृतिप्रदत्तां**
**मार्गान् शिलोच्चयचयांश्च समुद्रवेला: ।**
**राज्ञ: सुशासनमहो जनतासुरक्षा-**
**मोमानराष्ट्रशतकं लिखितुं प्रवृत्त: ॥**[1]

**Copyright © 2025 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

ओमानदेशेतिवृत्त :-य: प्रदेश : आरवसागरतटवर्ती ए. एल्. हजरपर्वतद्वारा परिवेष्टितो वर्तते। किम्बदन्त्यनुसारेणैष: स्थलभाग: प्राकृतिकविपर्ययेण समुद्रे निमग्न आसीदिति श्रूयते ।यथा कविनोक्तं यत्–

**अस्त्यारवोदधितटे गिरिराजबद्धः**

**कश्चित्सुदुस्तरशिलाविषमप्रदेशः ।**

**व्युत्पातहेतुजनितः स्थलभाग एष**

**ह्यासीन्निमग्न उदधाविति किंवदन्ती ।।**[2]

एष: वङ्गदेश: सम्प्रति पृथिव्याम् ओमानदेश इति नाम्ना उदित:। स एष देश: वैदेशिकशत्रुभि: उन्मुक्तस्सन् प्रतिदिनं जनमानवित्तै: संवर्द्धते। बहुकालात् प्राक् आरवीया: येमेनत: आगत्य वसवासं कृतवन्त:। स: सम्प्रति ओमाननाम्ना परिचित:। यथोक्तं कविना–

**येमेनतो बहुदिनादिह चारवीया**

**आगत्य ये ह्यधिवसन् बहुपूर्वकालात् ।**

**भूमौ च यत्र वसतिर्ह्यधुनास्ति तेषा-**

**मोमानदेश इति च प्रथितस्स नाम्ना ।।**[3]

सम्प्रति एष: ओमानदेश: विश्वे उन्नतस्थाने वर्तते।यत्र विविधापराध: शून्यमेव वर्तते ।वायुप्रदूषणमुदकदूषणं च रहितमस्ति। पुनश्च सौन्दर्यतत्त्वपरिपूरितो वर्तते। यथोक्तं कविना –

**ओमानदेश इह चोन्नत एव विश्वे**

**शून्यो हि यत्र सुतरां विविधापराधः।**

**वायुप्रदूषणमथोदकदूषणं नो**

**सौन्दर्यतत्त्वपरिपूरित एष देशः ।। "**[4]

**मस्काटनगरीवर्णनम्–**सुविदितो योऽर्णववङ्कदेश: ओमाननाम्ना व्यपदिश्यते । यस्तु पूर्व एसिया मध्यमहास्थलभागो वर्तते । तं केचिज्जना: पृथिव्यां मस्काट इत्यपि कथयन्ति। कविना उक्तं यत्–

**यस्त्वेसियाभिधमहास्थलमध्यपूर्वे**

**कश्चित् स्थितः सुविदितोऽर्णवङ्कदेशः।**

**ओमान इत्यभिभिहितः स जनैः पृथिव्यां**

**मस्काट इत्यपि च तं कथयन्ति केचित् ।।**[5]

सम्प्रति तस्य देशस्य शासकवर: स्थिरमतिनृपति: सुलतान् काबुस् नाम्ना ज्ञायते। ते स: निजराजधानीं मस्काटनगरीं कृत्वा सकला: सरला: प्रजाश्च पालयन्ति । उक्तं यत् –

**तद्देश्यशासकवरो ह्युधनैव सुल्तान्**

**काबुसिति स्थिरमतिर्नृपतिश्च नाम्ना ।**

**मस्काटनामनगरीं निजराजधानीं**

**कृत्यैव शास्ति सकलाः सरलाः प्रजाश्च ।।**[6]

पुनश्चात्र पर्तुगालस्य अधीश्वरेण समरे मस्काटनगरीं विजित्य तदधीनं कृतमासीत्। तदनन्तरं तुर्किराजः तस्मात् समितौ तं द्विवारं छित्वा भुवि स्वायत्तमेव कृतवान् । शतत्रयं वर्षं यावत् परतन्त्रतायाः पीडां प्राप्य महता श्रमेण संयुक्तराष्ट्रमुखपात्रस्य सहायं प्राप्य एषः मस्काटनगरी पुनः स्वतन्त्रोऽभवत्। मस्काट एष समरे किल पर्तुगाल- स्याधीश्वरेण विजितस्तदधीन आसीत्। छित्वा द्विवारमपि तं समितौ च तस्मात् स्वायत्तमेव कृतवान् भुवि तुर्किराज। स्थित्वा शतत्रयसमाः परतन्त्रतायां पीडामवाप्य बहुधा महता श्रमेण संयुक्तराष्ट्रमुखपात्रस्य सहायं प्राप्य एषः मस्काटनगरी पुनः स्वतन्त्रोऽभवत्।

**मस्काट एष समरे किल पर्तुगाल –**

**स्याधीश्वरेण विजितस्तदधीन आसीत् ।**

**छित्वा द्विवारमपि तं समितौ च तस्मात्**

**स्वायत्तमेव कृतवान् भुवि तुर्किराज ।।**

**स्थित्वा शतत्रयसमाः परतन्त्रतायां**

**पीडामवाप्य बहुधा मगता श्रमेण ।**

**संयुक्तराष्ट्रमुखपात्रसहयताप्त्या**

**मस्काट एष च पुनः ह्यवभवत्स्वतन्त्रः ।।**[7]

**ओमानदेशस्य वैशिष्ट्यम् –**कवि डॉ. किशोरचन्द्रमहापात्रमहोदयः ओमानदेशस्यवैशिष्ट्यं विषये अतीव सुन्दरतया वर्णयति यत्–

**समुद्रवङ्काभिधदेशमध्ये**

**सर्वोत्तमः सुन्दरदेश एषः।**

**सौन्दर्यदृष्ट्या निखिले हि विश्वे**

**स्थानं च यो द्वादशमेति चाद्य।।**

**ओमानदेशो धनधान्यसंयुतः**

**प्राप्नोति चासौ भुवि गौरवं पुनः ।**

**ओमानलोकाः सुजनाः सुसंयता**

**ओमानमानस्सततं समेधते ।।**[8]

समुद्रवङ्काभिधदेशमध्ये एषः ओमानदेशः सर्वोत्तमः सुन्दरदेशो वर्तते । अपि च समग्रे विश्वे सौन्दर्यदृष्ट्या ओमानदेशस्य स्थानं द्वादशस्थाने वर्तते। ओमानदेशः धनधान्येन परिपूर्णमपि च पृथिव्यामेषः गौरवं प्राप्नोति । ओमानदेशस्य जनाः सज्जनाः शृङ्खलिताश्च भवन्ति। प्रतिदिनमोमानः देशस्य गौरवं वर्द्धते।

**ओमानराष्ट्रशतकस्य विषयवस्तु**-संस्कृतसाहित्यवाङ्मये सत्स्वपि विविधाधुनिक- शतककाव्येषु "ओमानराष्ट्रशतकम् " स्वतन्त्रस्थानमलङ्करोति । शतककाव्येऽस्मिन् ओमानदेशसभौगोलिकस्थितिः, राजतन्त्रम्, आर्थिकस्थितिः, संस्कृतिः, नैसर्गिकप्रकृतिः, राजमार्गः, प्रशासनव्यवस्था इत्यादयो विषयाः कविना अतीव सुन्दरतया वर्णिताः विद्यन्ते। प्रकृतिवर्णने कवेः नावीन्यं सहृदया कल्पनाचातुरी च दृश्यते। अत्र समुदायरूपेण 106 श्लोकाः सन्ति। श्लोकानां विभागः त्रिंशद्भागेषु कृतो वर्तते। तत्रादौ प्रथमश्लोके गुरोः चरणकमलवन्दनपूर्वकं मङ्गलाचरणं विदधाति कविः। तदनन्तरं क्रमशःओमानदेशस्येतिवृत्तमष्टभिः श्लोकैः, शतकस्योद्देश्यम् (3 श्लोकैः), ओमानं प्रति विमानयात्रा (द्वाभ्यां श्लोकाभ्याम्), विमाने यात्रीणां कृते व्यवस्था (9श्लोकैः), विमानपत्तनान्नगरान्तप्रवेशव्यवस्था (चतुर्भिः श्लोकैः), मस्काटशब्दस्य व्युत्पत्तिः(एकेन श्लोकेन), तत्रत्यराजचरितम् (एकेन श्लोकेन), राज्ञः शासनव्यवस्था (सप्तभिः श्लोकैः), देशस्य प्रमुखमण्डलानि (द्वाभ्यां श्लोकाभ्याम्), देशस्य जनसंख्या (एकेन श्लोकेन), राजाभिषेकदिवसः (एकेन श्लोकेन ), राज्ञो जन्मदिवस : (एकेन श्लोकेन), ओमानदेशस्य पताका (द्वाभ्यां श्लोकाभ्याम्), ओमानीमुद्रा (द्वाभ्यां श्लोकाभ्याम्), ओमानदेशस्य भाषा लिपिश्च , (एकेन श्लोकेन), ओमाने सूर्योदयसमयः (एकेन श्लोकेन), तद्देशस्य जलवायुः (द्वाभ्यां श्लोकाभ्याम्), मस्काटस्य गृहमार्गादयः (नव श्लोकैः), तत्रत्यविपण्यादयः (द्वाभ्यां श्लोकाभ्याम्), तत्रत्या भारतीयाः (त्रिभिः श्लोकैः), तदधिवासिनां जीविका (4 श्लोकैः), ओमानीयविवाहव्यवस्था (द्वाभ्यां श्लोकाभ्याम्), तत्रत्यानां जनानां वेशभूषा (4 श्लोकैः), तत्रत्यखाद्यपेयम् (4 श्लोकैः), तद्देशीयसमूहप्रार्थना (एकेन श्लोकेन ), तत्रत्यनानाधर्ममन्दिराणि(3 श्लोकैः), देशं प्रति बहिर्देशीयानामाकर्षणे हेतुः (3 श्लोकैः), तत्रत्यदर्शनीयस्थानानि , (19 श्लोकैः), एवञ्चान्ते ओमानदेशस्य वैशिष्ट्यम् (3 श्लोकैः) रचितं वर्तते।

संस्कृतसाहित्ये भारतेतरराष्ट्रवर्णनात्मकं काव्यं नितान्तं विरलम्। अतः शतककाव्यमिदं गौरवोज्ज्वलं स्थानं लभते संस्कृतकाव्यसाम्राज्ये। एतत्काव्यं सूक्ष्मेक्षिकया सम्पन्नं काव्यात्मकसौन्दर्येण परिपूर्णमस्ति । अस्मिन् काव्ये कविः किशोरचन्द्रमहापात्रमहोदयः मस्काटभ्रमणस्य स्वकीयानुभुतिं वर्णयति । तत्र वर्णनीयविषयो भवति यत् - एकदा कविः अवसरं प्राप्य ओमानदेशं प्रति परिभ्रमणाय गतवान्। तत्र कवेः ज्येष्ठपुत्रः मस्काटनगरस्य एकस्मिन् प्रतिष्ठाने गणवित्तनिवेशपरिचालकरूपेण कर्म कुर्वन् सपरिवारस्तिष्ठति। अतः स्वकुटुम्बमेलनेन सह विदेशभ्रमणस्य नूतनस्थानदर्शनस्य च सुयोगो कविना प्राप्तः। तत्र ओमानदेशस्य विशेषतः तद्राजधान्या : मस्काटनगरस्य प्रमुखस्थानानां दर्शनमकरोत्। तत्रत्यमार्ग-प्रासाद-विपणी-नद्युपवन-पर्वत- सागरोद्यान निर्झर - नौकासय- वेलाभूमि -सेतु-मस्जिद्-गीर्जामन्दिरप्रभृतीनां दर्शनमतीवानन्देन कृतवान्।

विशेषतया मस्काटनगरस्य प्राकृतिकं सौन्दर्यं सर्वातिशायि भवति। पार्वत्यभूमिं समीकृत्य तत्र च मार्गप्रासादोद्यानादिनिर्माणं तत्प्रशासकेन महता श्रमेण कृतम्। 1970 ख्रीष्टाब्दादारभ्य सम्प्रत्यपि वर्तमानो राजा सुल्तान् काबूस् मस्काटनगरममरावतीपुरमिव

सज्जीकर्तुं यतते । प्रजाभ्यो न करं गृह्णाति नापि कर्मचारिभ्यः आयकरम्। राष्ट्रे चौर्य पारदार्य–भद्रजनताशोषणपीडन–हननादिकुत्सितकर्माणि नदृश्यन्ते । एतदर्थं राज्ञो दृढं प्रशासनमेव कारणम्। नगरस्य परिमलव्यवस्थया सह गमनागमन नियम–शृङ्खला– जनसुरक्षाव्यवस्थादीनि चातीव समीचीनानि। इस्लामधर्मप्रवणदेशेऽप्यत्र धर्मान्तरोपासकानां कृते न जुगुप्सा नाऽपि विरोधभावो दृश्यते । प्रत्युतेतरधर्मनिष्ठव्रतोत्सवादिषु प्रशासनपक्षतः सहयोगः प्रदीयते। आयतनेन लोकसंख्यया चातीव क्षुद्रोऽपि देशोऽयं शान्तिमैत्रीशृङ्खला सामाजिकताप्रदर्शनक्षेत्रेषु विश्वे आदर्शभूत एव । एवंतत्रत्यप्राकृतिकसौन्दर्येण राज्ञः प्रजापालनेन प्रशासनिकशृङ्खलया चाभिभूत एव। एतत्सर्वमनुभूय कविः आचार्यः किशोरचन्द्रमहापात्रमहोदयः ओमानराष्ट्रशतककाव्ये अतीव प्राञ्जलतया चित्रयति। यथोक्तं कविना –

**ओमानराष्ट्रस्य परिस्थिति कृति :**

**नीतिश्च रीति : प्रकृतिश्च संस्कृतिः ।**

**स्वल्पैरहोभिर्ह्यवधारिता यथा**

**पद्यैस्तथैव प्रतिपादिता मया ।।**[9]

**ओमानराष्ट्रशतके मङ्गलाचरणम्** – ओमानराष्ट्रशतकस्य प्रारम्भे कविः स्वकीयगुरोः चरणारविन्दं पादपद्मयुगलं नमस्करोति । एवं तस्य (गुरोः) चिरभास्वरदिव्यमूर्तेः ध्यानं करोति । पुनश्च तेषां बहुमूल्योपदेशानां स्मरणं कृत्वा ओमानराष्ट्रविषये काव्यनिर्माणकर्मणि प्रवृत्तो भवति । यथा –

**नत्वा गुरोः परमपावनपादयुग्मं**

**ध्यात्वा च तस्य चिरभास्वरदिव्यमुर्त्तिम् ।**

**स्मृत्वा तदीयबहुमूल्यहितोपदेशा-**

**नोमान राष्ट्रविषये कवयामि किञ्चित् ।।**[10]

**उपसंहारः-** एवमेव शोधलेखेऽस्मिन् ओमान् देशस्य भौगोलिकस्थितिः राजतन्त्रमार्थिकस्थितिम्, संस्कृतिः,नैसर्गिकप्रकृतिः, राजमार्गः, प्रशासनव्यवस्था एवं तत्र राज्ञः–प्रजानां मध्ये शृङ्खलितसम्बन्धः सर्वान् अभिभूतं करोति। ओमान्राष्ट्रे शान्ति मैत्री शृङ्खला सामाजिकानां कृते आदर्शभूतोऽस्ति। एवं रुपेण काव्यस्यास्य महत्त्वं प्रतिपादितं भवति।

**सहायकसूची-**

1.ओ. रा. श. – 12
2.ओ. रा. श. – 2
3.ओ. रा. श. – 5
4.ओ. रा. श. – 4
5.ओ. रा. श.
6.ओ. रा. श. – 7
7.ओ. रा. श. – 8-9

8.ओ. रा. श. – 104– 105
9.ओ. रा. श. – 106
10.ओ. रा. श. – 1

**सहायकग्रन्थसूची**

**1.ओमानराष्ट्रशतकम्-किशोरचन्द्रमहापात्रः, जागेश्वरी लेन्, बालिघाट, पुरी, प्रथमसंस्करणम्-2013**